International Journal of Sanskrit Research 2024; 10(2): 211-214

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(2): 211-214
© 2024 IJSR
www.anantaajournal.com
Received: 01-01-2024
Accepted: 04-02-2024

**डॉ. रूपकुमारपण्डा**
संस्कृतविभागाध्यक्षः
ध्यमग्राम वि.एड्. कलेज,
कोलकाता, पश्चिमवंग, भारत

# मनुयाज्ञवल्क्यस्मृतौ मानवीयव्यत्तित्वविकासतत्त्वानि

**डॉ. रूपकुमारपण्डा**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i2d.2354

**सारांश**
सर्वेषां ज्ञानरत्नानामाकरः, सुखशान्तिप्रबोधकः, भारतीयसंस्कृतेः आधारस्तम्भश्च वेदः । दर्शन–राजनीतिमनोविज्ञानगणित–रसायणशास्त्र–वनस्पतिविज्ञान–पदार्थविज्ञान–भूगर्भविज्ञान–नाटककाव्यकामशास्त्रललितकला–विविधविषयाणां प्रतिपादकः वेदः। राष्ट्रियता, बन्धुत्वभावना, परोपकारः, सत्कर्मः, मातृपितृदेवातिथिसत्कृतिः, शिल्पशास्त्रमर्थशास्त्रं, राजनीतिविज्ञानं, विश्वस्य प्राचीनेतिहासश्चेत्येतत्सर्वं वेदस्य मूल्योपादानं भवति । श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः । प्रपञ्चेऽस्मिन् भारतभूखण्डे धर्मस्य प्राधान्यं वरीवर्त्तते इति समेषां प्रेक्षावतां सिद्धान्तः । दुःखदैन्यपरिपूर्णेऽस्मिन् संसारे जननानन्तरं मनुष्यः स्वस्योन्नतये सततं यतते। तस्योन्नतिः पुरुषार्थचतुष्टयस्योपरि निर्भरशीला भवति । अयं तावत् धर्मः सनातनरूपोऽनादिरनन्तो नित्योऽपि च चतुर्दशविद्याविभूषितभारतीयसंस्कृतिः विश्वे श्रेष्ठतरस्थानमलंकरोति । धर्मशास्त्रे विंशतिधर्मशास्त्रकाराः सन्ति । तेसां नामानुसारेण स्मृतिशास्त्राणि संरचितानि सन्ति । धर्मशास्त्रे यानि तत्त्वानि सन्ति, तानि मानवानां मूल्यसंवर्द्धने व्यक्तित्वविकासे च सहकुर्वन्ति । वस्तुतः अहिंसा परमो धर्मः वर्णभेदानामनुसारेण स्वस्वकर्म कर्त्तव्यम्, भक्ष्याभक्ष्यविषये चिन्तनम्, आश्रमधर्मपालनम्, अतिथिपूजनम्, आश्रमवातावरणनिर्माणम्, सच्चिन्तनमाध्यमेन च मानवानां नैतिकाध्यात्मिक.सामाजिक.शैक्षिक. राष्ट्रियमूल्यैः साकं तेषां गुणानां विकासः भवति।

**कूटशब्दः** प्रस्तावना, धर्मशास्त्रं, व्यक्तित्वम्, व्यक्तित्वविषयकं भारतीयमतम्, मानवीयव्यत्तित्वविकासतत्त्वानि

**प्रस्तावना**
सर्वेषां ज्ञानरत्नानामाकरः, सुखशान्तिप्रबोधकः, भारतीयसंस्कृतेः आधारस्तम्भश्च वेदः। दर्शनराजनीतिमनोविज्ञान गणित–रसायणशास्त्र–वनस्पतिविज्ञान–पदार्थविज्ञान–भूगर्भविज्ञान–नाटककाव्यकामशास्त्रललितकला–विविधविषयाणां प्रतिपादकः वेदः। राष्ट्रियता, बन्धुत्वभावना, परोपकारः, सत्कर्मः, मातृपितृदेवातिथिसत्कृतिः, शिल्पशास्त्रमर्थशास्त्रं, राजनीतिविज्ञानं, विश्वस्य प्राचीनेतिहासश्चेत्येतत्सर्वं वेदस्य मूल्योपादानं भवति । विद् ज्ञाने इति धातोर्घञि निष्पन्नो वेदशब्दः ज्ञानराशेर्ज्ञानसंग्रहग्रन्थस्य च द्योतको भवति । वेदः अपौरुषेयः । वेदस्यार्थगनमं सामान्यजनेषु कष्टदायकम् । अस्य गूढतत्वानि सामान्यजनाः अवगन्तुं नैव शक्नुवन्ति । कारणादस्मात् सामान्यलोकानां विवृद्ध्यर्थं, मोक्षप्राप्त्यर्थ्ञ्च वेदस्य सरलीकृतरूपं भवति स्मृतिः । वेदेभ्य तत्वानि लोकार्पणाय स्मृतिकारैः स्मृतिनां संरचना कृता । बस्तुतः वेदस्यभावं स्पष्टरूपेण स्मृतौ वर्त्तते ।

**धर्मशास्त्रम्**
प्रपञ्चे विद्यमानेषु धीमत्सु मानवाः श्रेष्ठाः। ते एव मानवाः जन्मनः मरणपर्यन्तं स्वस्योन्नतये सततं सुकर्मसु दुष्कर्मसु लिप्ताः भवन्ति । दैनन्दिनसुखसमृद्धिकामये कदापि किमपि कर्तुमकर्तुं शक्नुवन्ति यत् निरन्तरं समाजे वयं पश्यामः । स्वस्य इतरेषाञ्च सुखसमृद्धिवृद्धये यानि कर्माण्यकर्माणि आचरितानि तान्येषां परिचयात्मकान्यपरेषां पुरतः सज्जनदुर्जनभेदेन । स्थानकालपात्रभेदेन कर्माण्यकर्माणि कर्तव्याकर्तव्यानि वा, कर्तव्यानि चेत् कथं कर्तव्यानीत्यस्मिन्विषये यत् शास्त्रमुपदिशति तदेव धर्मशास्त्रं नाम्ना प्रतिभात्यस्मिन्प्रपञ्चे ।

**Corresponding Author:**
**डॉ. रूपकुमारपण्डा**
संस्कृतविभागाध्यक्षः
ध्यमग्राम वि.एड्. कलेज,
कोलकाता, पश्चिमवंग, भारत

आचारः परमो धर्मः
विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निवोधतः ।। (म.स्मृ.२.६)
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।। (म.स्मृ.१.१०८)

मनुयाज्ञवल्क्यवचनानुसारेण धर्मलक्षणानि प्रतिभात्युपरिस्थश्लोकेषु । धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रम् । धर्मशास्त्रशब्दकोषे पं. कुलमणिमिश्रेण कथितम् .सकलशास्त्रपुरस्कृतं निखिललोकसुरक्षकं कृत्याकृत्य– प्रतिपादकत्वेन नित्यनियततोपादेयं साक्षाद्वेदार्थानुमापकत्वेन वेदवत् प्रमाणं तपः स्वाध्याय पूतचरित्राणां यमनियमानुष्ठानयतात्मनां सकलसंस्कारसंस्कृतानामात्मगुण विद्योतितान्तः करणानां ब्रह्मादिस्तम्बपर्यन्तं सकलभुतहितकाक्षिणां रागद्वेषरहितानां मनुगौतमबशिष्ठादिमहर्षिणां गुणिगणसमादरणीयं प्राचीनतमं शास्त्रमिति । मन्वादिस्मृतिग्रन्थेषु यस्मिन्कस्मिन्नपि विषये मतवैचित्रं दृश्यते । मतपार्थक्यकारणात् स्मृतिकाराणां संख्यास्वपि वैचित्रं दृश्यते । योगीश्वरेण याज्ञवल्क्येण याज्ञवल्क्यस्मृतौ स्मृतिनां संख्याविषये उक्तमस्ति यत् –

मन्वत्रि– विषणु–हारीत–याज्ञवल्कोशनो ङ्गिराः
यमापस्तम्ब–संवर्त्ताः कात्यायन–बृहस्पतिः।।
पराशर–व्यास– शङ्खलिखिता– दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः ।। (या.स्मृ.१.७)

**व्यक्तित्वम्**

कस्यचित्मानवस्य सामग्रिकरूपं भवति व्यक्तित्वम् । मनोविज्ञाने एतावत् पर्यन्तं बहवः मनोवैज्ञानिकाः व्यक्तित्वविषये आलोचितवन्तः परन्तु कश्चिदपि सर्वजनग्राह्यां परिभाषां प्रदातु नैव शक्नोति । यतो हि मानवानां व्यवहाराः नित्यपरिवर्तनशीलाः । व्यक्तित्वस्य आंग्लशब्दः Personality. Persona इति ल्यटिनशब्दादागतः । अस्यार्थः भवति मुखावरणम् । शिक्षायाः अन्यतममुद्देश्यं व्यक्तित्वविकासः ।सामान्यतः लोकसमाजे शारीरिकसंरचना –स्वास्थ– सौन्दर्य भूषणव्यवहारादिगुणान् व्यक्तित्वरूपेणावगम्यते । व्यक्तित्वविषये बहवः मनोवैज्ञानिकाः स्वस्य मतानि प्रकटितानि ।तानि भवन्ति–
अल्पोर्टमहोदयः – व्यक्तित्वं कस्यचित्मानवस्य मनोशारीरिकव्यवस्थानां गत्यात्मकं संघटनं वर्तते यत् परिवेशेन सह तस्यापूर्वसमायोजनं निर्धारयति ।
गिल्फोडमहोदयः – व्यक्तित्वं गुणानां समष्टिस्वरूपं वर्तते ।

**व्यक्तित्वविषयकं भारतीयमतम्**

व्यक्तित्वस्य प्रचलितस्वरूपं भारतीयशास्त्रेषु विद्वज्जनैः विचारः कृतः । दर्शनशास्त्रे आत्मस्वरूपं विवेचितं वर्तते । उपनिषत्सु निरूपिताः अन्नमयादिपञ्चकोषाः शरीराद्मनं प्रति उत्तरोत्तरविकासस्य परिचायिकाः वर्तन्ते । एतेषां कोषाणां सम्बन्धो व्यक्तित्वस्य विविधैरायामैः सह विद्यते । व्यक्तित्वगुणानां वर्णणं वाल्मीकिरामायणे कृतं वर्तते । तत्र रामस्य पूर्णव्यक्तित्वस्य जिज्ञासुः भुत्वा वाल्मीकिः कः अस्मिन् साम्प्रतं लोके इत्य¬दिनां नारदं बहु पृच्छति स्म । ततः नारदः रामस्य व्यक्तित्वद्योतकान् गुणान् वर्णयति स्म । सर्वाङ्गपूर्णव्यक्तित्वस्य निरूपणं श्रीमद्भागवद्गीतायां वर्णितानां सत्त्वरजस्तमोगुणानामाधारेणापि शक्यते । त्रिगुणात्मिकायां सृष्टौ केचन स्वत्त्वप्रधानाः, केचन रजोगुणप्रधानाः, केचन तमोगुणप्रधानाश्च । त्रयाणामेव गुणानां मात्राभेदेन व्यक्तित्वभेदाः जायन्ते । स्वत्त्वगुणात् ज्ञानं , रजोगुणाल्लोभः, तमोगुणाच्च प्रमादः जायन्ते । ईश्वरकृष्णः त्रयाणांमेवगुणानां विषये उक्तंमस्ति यत्–

सत्त्वलघुप्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः ।
गुरुवरणकमकेव तमः प्रदीपवच्चार्यतो वृत्तिः।।

ज्योतिषशास्त्रकाराणामतानुसारं जन्मराश्यनुगुणं व्यक्तित्वं द्वादशप्रकारकम् । एवम्प्रकारेण भारतीयवाङ्मये व्यक्तित्वस्य स्वरूपविषये तदन्तनिर्हितगुणानां विषये, तद्भेदविषये च प्रभूतो विचारो विहितो वर्तते ।

**मानवीयव्यत्तित्वविकासतत्त्वानि**

शारीरिकसंरचना,स्वास्थसौन्दर्यवेषभूषेत्यादि–सामान्यगुणान्व्यक्तित्वमिति लौकिकाः मन्यन्ते । कदाचिदन्नपानादीन्, भाषणशैलीं, चलनशैलीञ्च दृष्ट्वा व्यक्तिविषये सामान्यीकरणेन नैकानि मतानि समागच्छन्ति । यथा– अयं भोजनप्रियः, अयं वाग्मी, अयं मियभाषी, अयं भ्रमनशीलश्चेत्यादयः ।बस्तुतः मानवीयगुणानां समुहः भवति व्यक्तित्वम् । अतः मानवीयमूल्याणां संवर्द्धनेन व्यक्तित्वस्य विकासः भवति । मानवीयव्यक्तित्वमाकर्षकं प्रभाव्युत्पादकञ्च कर्तुं स्मृतिग्रन्थेषु चर्चितानि निम्नोक्त– वैशिष्ट्यानि स्वकीये व्यक्तित्वे आनितव्यानि ।

**जितेन्द्रियः**

विद्याविनयहेतुरिन्द्रियजयः । कामक्रोधलोभमानमदहर्षत्यागात्कार्यः । कर्णत्वगक्षि–जिह्वाघ्राणेन्द्रियाणां
शब्द–स्पर्श–रूप–रस–गन्धेष्वविप्रतिपत्ति–रिन्द्रियजयः।
मनुना इन्द्रियसंयमविषये उक्तमस्ति यत् –
इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
संयमे यत्नमातिष्टेद्विद्वान्यन्तेव वाजिनाम् ।। (म.स्मृ.२.८८),
श्रुत्वा स्प–ष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हुष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ।। (म.स्मृ.२.९८),

**संकल्प**

संकल्पः भवति तादृशः कश्चित्मानसिकोपादानसदृशः येन मानवः लक्ष्यपूरणं कर्तुं शक्यते । प्रयोजनं विना यथा मन्दः न प्रवर्त्तते तथैव संकल्पं विना कार्यमपि नैव साधितुं शक्यते । संकल्पेनागताना समस्यानां समाधानपुरस्सरं लक्ष्यप्राप्तिः भवति । अस्मिन्विषये मनुना उक्तमस्ति यत् –

संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः ।
व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः ।।(म.स्मृ.२.३)

अकामस्य क्रिया काचिद् दृश्यते नेह कर्हिचित् ।
यद्यद्धि कुरुते किंचित्तत्तत्कामस्य चेष्टितम् ।। (म.स्मृ.२.४)

**गुर्वाज्ञापालनम्**

व्यक्तित्वविकासस्यापरमेकं तत्त्वं गुर्वाज्ञापालनम् । निषेकादीनि कर्माणि यः करोति सः गुरुः । अद्यतनकाले गुरुशिश्ययोः सम्पर्क्यस्य मर्यादा नैव दृश्यते । धर्मशास्त्रीयग्रन्थेषु विशेषतया मनुस्मृतौ अस्मिन्विषये सम्यगालोचनमस्ति । यथा–

शरीरं चैव वाचं च बुद्धिन्द्रियमनांसि च ।
नियम्य प्रञ्जलिस्तिष्टेद्वीक्षमाणो गुरोर्मुखम् ।। (म.स्मृ.२.१९२)
यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रुषुरधिगच्छति ।। (म.स्मृ.२.२१८)
एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः।
स गच्छत्युत्तमस्थानं न चेहाजायते पुनः ।।(म.स्मृ.२.२४९)

**सदाचारः**

सदाचाराणां परिपालनं सर्वदा करणीयम् । अयमेव सर्वोत्तमं तपः । शिष्टानामाचाराणामनुसरणं सदाचारः । सदाचारेण मानवाः समाजे प्रशंसिताः भवन्ति । येन प्रकारेण सज्जनाः संसारे परिवारे च अपरैः साकमाचरन्ति व्यवहारं कुर्वन्ति सैव सदाचारः । देशस्य समाजस्यं राष्ट्रस्य चोन्नतये सच्चरित्रस्यावश्यकता दृश्यते । अयंञ्च सदाचारः सच्चरित्रविनिर्माणे साहाय्यं करोति । स्मृतिग्रन्थेषु महती चर्चास्ति ।

आचारो परमो धर्मः इति शास्त्रे कथितम् । अतः आचाराणामेवञ्च आचारात्विच्यूतानां विषये स्मृतौ उक्तं यत् –

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।। (म.स्मृ.२.१२)
आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः।
आचाराद्धनमक्षय्यमाचारो हन्तलक्षणम् ।। (म.स्मृ.४.१५६)

तत्त्वान्येतानि मानवानां सकाशे उद्दीपकस्वरूपानि भवन्ति । येषां प्रभावकारणात्मानवाः सदाचारयुक्ताः भवन्ति । अर्थात् सुदृढव्यक्तित्वस्याधिकारिण भवन्ति । सदाचारादेव मानवः दीर्घमायुमक्षयं धनं लभते। अतः ऋषिभिः सकलवर्णेभ्यः सदाचारः अनिवार्यः प्रतिपादितः ।एतदर्थमुक्तमस्ति यत्– चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः । मानवानां सम्पूर्णतया सामाजिककरणाय अर्थात् सामाजिकमूल्याणां विकासाय, तेषां चारित्रिकव्यवहाराणां सदाचारे परिवर्तुं धर्मशास्त्रीयग्रन्थेषु तत्त्वानामेतानां ज्ञानमवश्यमेव भवेत् ।

**सन्तोषः**

विश्वस्य प्रतिमनुष्यः सुखमानन्दमिच्छति । मानवेषु अन्तर्निहितक्रियासु अन्तर्निहितेच्छायारूपेण आनन्दानुभूतिः स्वयमेव अनुभवति। विना कार्यमानन्दानुभुतेः प्राप्तिः सर्वेषामिच्छा वर्तते । आनन्दः धनात्मकसंवेगः वर्तते । आनन्दो यदा ह्रासतां याति तदा प्रसन्नतापदेनाभिडीयते, परन्तु वर्धते यदा तदा उल्लासपदेनोच्वते । धर्मशास्त्रीयग्रन्थेषु सन्तेषस्य महत्वप्रसङ्गे मनुना उक्तमस्ति यत्–

संतोषं परमास्थाय सुखार्थ संयते भवेत् ।
संतोषमूलं हि सुखं दुःखमूलं विपर्ययः ।। (म.स्मृ.१४.१२)

**अनुशासनम्**

मानवजीवने, समाजे, देशे, राष्ट्रे अनुशासनस्यावश्यकता प्रत्येकस्मिन्क्षेत्रे अुपिहार्यमस्ति । बाव्यादारभ्य वृद्धावस्थां यावत् जीवने अनुशासनमावश्यकम् । अनेन मानवचरित्रस्य विकासः भवति । सूक्ष्मतया अवलोकनेन प्रकृति अप्यनुशासनेननियन्त्रिता भवति । यथा सूर्यः प्रतिदिनं निर्दिष्टे समये आकाशे उदेति , षडऋतवः यथासमये क्रमाणुसारमागच्छन्ति, नक्षत्राण्यनुशासनेन स्वमार्गे भ्रमन्ति , अनुशासिताः मेघाः यथासमये वर्षन्ति च। अतः अस्माभिः सर्वैः सदैव स्वकल्याणं दृष्ट्वा समाजकल्याणबुद्ध्या च सर्वदानुशासनं स्वीकर्त्तव्यमनेन सर्वेषामुन्नतिः । भारतवर्षे प्राचीनकालादेवानुशासनस्य महत्वं वर्णितमस्माकं शास्त्रस्य पदे पदे । साम्प्रतं सर्वत्रानुशासनसमस्या दृश्यते श्रुयते च। स्वदेशे विदेशेषु चानुशासनसमस्या बिदुसां शिक्षाशास्त्रिणाञ्च विचारचर्चा विषयः ।प्राथम्येन ब्रह्मचर्यमयो कालः विद्याध्ययने विनियोजनीयः– इदमेव मुख्यं कर्त्तव्यं छात्रणाम् । अध्ययनकाले गुरोः वचनं श्रुत्वा धैर्यमवलम्ब्य अध्ययनं कुर्वन्ति ते पश्चात्सुखेन कालं गमयन्ति व्यक्तित्वविकासपुरस्सरंसामाजिकप्रतिष्ठालाभेन सह । अधिकाधिकाः धर्मशास्त्रीयश्लोकाः अनुशासनं द्योतयन्ति । यथा–

अहोरात्रे विभज्यते सूर्यमानुषदैविको ।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ।।(म.स्मृ.१.६४)

स्मृतिग्रन्तेषु विद्यमानानि संस्कारतत्त्वानि –वर्णानां कर्म–भक्ष्याभक्ष्यविधिः–अशौचव्यवस्थादीन्यनुशासनेन सहअग्रे गन्तुं मानवान्प्रभावयन्ति ।

**स्वास्थ्यम्**

उत्तमव्यक्तित्वस्य प्रतीको भवति शारीरिकसंरचना । शारीरिकसंरचनायामेव शारीरिकस्वास्थ्यं सम्मिलितं कुर्मः । यावत्शारीरिकपूर्णता न भविष्यति तावत्मानवस्य व्यवहाराः अपि सामान्याः नैव भवन्ति, तथा च तस्य विकासः अपि सन्तुलितं न भवति । मानवजीवनस्य चतुर्विधपुरुषार्थस्य सिद्धयर्थमारोग्यमावश्यकम् । धर्मकृत्येषु सत्याहिंसाब्रह्मचर्यपालनं, लोकसेवा, परोपकरणं, पूजोपासनादिकं धर्मकृत्यमारोग्यायत्तम् । स्वस्थ्यः, नीरोगः मानवः यज्ञादिविधिं, पूजाकर्म, विविधव्रतपालनं, अध्ययनमध्यापयञ्च कर्त्तुं समर्थः भवति । भोजनागिविषये मनुना क्तमस्ति यत्

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ।
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ।।(म.स्मृ.२.५७)

शय्यात्यागकालः मानवशरीरं प्रभावयत्। कदा शय्यात्यागः करणीयः, किं किं कर्त्तव्यमकर्त्तव्यञ्चेत्यस्मिन्विषये उपदिशन्ति धर्मशास्त्रीयतत्त्वानि । अस्मिन्प्रसङ्गे याज्ञवल्क्येनोक्तं यत् –

ब्राह्मे मुहुर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।
धमार्थकामान्वे काले यथाशक्ति न हापयेत् ।। (या.स्मृ.१.११५)

**वाक्पटुता**

व्यक्तित्लस्य विकासे शारीरिकभषायाः गुरुत्वं वर्तते । भावप्रकाशस्य माध्यमो भषा । शाब्दिकाङ्गिकभेदेन सा च द्विधा विभज्यते । लेख्यकथ्यभषा भवति शाब्दिकी , अङ्गैः भावप्रकाशात्मिका आङ्गिकी भाषा । यैः कैः साकं व्यवहारस्य प्रधानमाध्यमं भवतीयं भाषा । अनया एव वक्तुः व्यक्तित्वं परिज्ञायते । वाक्पटुताविचारक्षमताविकासाय उपादेयस्वरूपाणां तत्त्वानां विषये मनुना उक्तं यत् –

सत्यपूतां वद्वेद्वाचं मनः पूतं समाचरेत् ।।(म.स्मृ.६.४६)
सत्यं ब्रुयात् प्रियं ब्रुयात् न ब्रुयात् सत्यमप्रियम् ।
प्रियञ्च नानृतं ब्रुयाद् एषः धर्मः सनातनः ।।(म.स्मृ.४.१३८)

सर्वदा सत्यभाषणं करणीयम् । यतो हि सत्यमेव धर्मस्य मूलाधारो भवति । भारतवर्षस्य प्रतीकचिह्ने अपि लिखितमस्ति –सत्यमेव जयते । अपि च यजुर्वेदे – इदमहमनृतात सत्यमुपैमि । कुशलविनिमये किञ्चन कौशलं शिक्षयत्येतानि तत्त्वानि । येन वक्तुः वाक्शैल्याः विकासः जायते ।

**उपसंहार**

न केवलमुपय्युक्तान्गुणान् अपि तु स्मृतिशास्त्राणामाधारेण मातृपितृगुरुषु भक्तिभावं सृजनेन, कुटुम्बभावना –परोपकारसामाजिक शैक्षिकनियमानां परिपालनेन, सच्चरित्रविनिर्माणेन, कोपादिदुर्गुणानां नियन्त्रणेन,सर्वजनहितगुणानामेवञ्च धर्मलक्षणानामत्मस्थकरणेन च सम्पूणव्यक्तित्वस्य विकासः भवतीति नास्तियत्र सन्देहस्यावसरः।सम्प्रति जनमामसे मूल्यस्याभावः दृश्यते । अतस्मात्कारणात्क्रोधस्य प्रदुर्भावः, नैतिकतायाः विघटनं, दयाक्षमासेवाभवनायाः अभावादि–ऋणात्मकगुणानां प्रभावः व्यक्तिष्वागच्छति । अनेन दृश्यते अवक्षयः मानवव्यक्तित्वस्य । व्यक्तेः सामूहिकगुणानां विकासः भवति व्यक्तित्वम् । गुणानां विकासः सर्वजनग्राह्यः भवति चेत् व्यक्तित्वस्य विकासः भवतीत्यर्थः । अपरान् प्रभावयितुं, सामञ्जस्यसंस्थापयितुं, नैतिकतां संवर्द्धनाय, मूल्याणां विकासाय अर्थात् व्यक्तित्वस्य सम्पूर्णविकासाय प्रधानाधाररूपेण शास्त्रोक्त –वर्णधर्म–संस्काराणां यथानियम–परिपालनमावश्यकम् ।

**सन्दर्भग्रन्थसूची**


1. मनुस्मृतिः.. चौखम्बा संस्कृत सिरिज, वाराणसी१९७०
2. याज्ञवल्क्यस्मृतिः . डॉ. गंगासागरराय . चौ. सं. प्रतिष्ठान, दिल्ली २००६/२
3. शिक्षामनोविज्ञानम् .डॉ.लोकमान्यमिश्रः मृगाक्षीप्रकाशन, लखनऊ २००६/१,
4. प्रायोगिकमनोविज्ञान . डॉ.प्रीति वर्मा .विनोद पुस्तकमन्दिर आगरा १९९६

5. शिक्षामनोविज्ञानम् .वेम्पटराघवाचार्यः .केन्द्रियसंस्कृतविद्यापीठ तिरूपति १६६०/१
6. व्यक्तित्व का मनोविज्ञान डॉ. सीताराम जयसवाल विनोद पुस्त. मं., आगरा १६६८/२
7. समाज मनोविज्ञान डॉ.एस एस माथुर विनोद पुस्तक मन्दिर आगरा २०१०/३
8. असामान्य मनोविज्ञान के मूल आधार डॉ. लाभ सिंहतिवारी विनोद पुस्तकमन्दिर आगरा २००६/१
9. प्रयोगिकमनोविज्ञान डॉ.प्रीति वर्मा विनोद पुस्तकमन्दिर आगरा १६६६/२
10. नवीन शिक्षा मनोविज्ञान डॉ.नीती त्यागी अग्रवाल पब्लिकेशन्स आगरा २००४/१
11. मनोविज्ञान,समाजशास्त्र तथा शिक्षा में शोध विधियाँ अरुण कुमार सिंह ...मोतिलाल बनारसीदास १६६२/३
12. बाल मनोविज्ञान बाल विकास डॉ. डी.एन. श्रीवास्तव विनोद पु. मन्दिर आगरा २००६/३